પાર્ષ્ણિગ્રહાસ્તારયિતું ન ચાશકન્ ॥ ૨૮॥

નિયુધ્યતોરેવમિભેન્દ્રનક્રયો-
ર્વિકર્ષતોરન્તરતો બહિર્મિથઃ ।
સમાઃ સહસ્રં વ્યગમન્ મહીપતે
સપ્રાણયોશ્ચિત્રમમંસતામરાઃ ॥ ૨૯॥

તતો ગજેન્દ્રસ્ય મનોબલૌજસાં
કાલેન દીર્ઘેણ મહાનભૂદ્વ્યયઃ ।
વિકૃષ્યમાણસ્ય જલેઽવસીદતો
વિપર્યયોઽભૂત્સકલં જલૌકસઃ ॥ ૩૦॥

ઇત્થં ગજેન્દ્રઃ સ યદાઽઽપ સઙ્કટં
પ્રાણસ્ય દેહી વિવશો યદૃચ્છયા ।
અપારયન્નાત્મવિમોક્ષણે ચિરં
દધ્યાવિમાં બુદ્ધિમથાભ્યપદ્યત ॥ ૩૧॥

ન મામિમે જ્ઞાતય આતુરં ગજાઃ
કુતઃ કરિણ્યઃ પ્રભવન્તિ મોચિતુમ્ ।
ગ્રાહેણ પાશેન વિધાતુરાવૃતો-
ઽપ્યહં ચ તં યામિ પરં પરાયણમ્ ॥ ૩૨॥

યઃ કશ્ચનેશો બલિનોઽન્તકોરગા-
ત્પ્રચણ્ડવેગાદભિધાવતો ભૃશમ્ ।
ભીતં પ્રપન્નં પરિપાતિ યદ્ભયા-
ન્મૃત્યુઃ પ્રધાવત્યરણં તમીમહિ ॥ ૩૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં અષ્ટમસ્કન્ધે
મન્વન્તરાનુવર્ણને ગજેન્દ્રોપાખ્યાને દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

પ્રણવં સત્યમવ્યક્તં ગોવિપ્રાન્ ધર્મમવ્યયમ્ ।
દાક્ષાયણીર્ધર્મપત્નીઃ સોમકશ્યપયોરપિ ॥ ૨૨॥

ગઙ્ગાં સરસ્વતીં નન્દાં કાલિન્દીં સિતવારણમ્ ।
ધ્રુવં બ્રહ્મઋષીન્ સપ્ત પુણ્યશ્લોકાંશ્ચ માનવાન્ ॥ ૨૩॥

ઉત્થાયાપરરાત્રાન્તે પ્રયતાઃ સુસમાહિતાઃ ।
સ્મરન્તિ મમ રૂપાણિ મુચ્યન્તે હ્યેનસોઽખિલાત્ ॥ ૨૪॥

યે માં સ્તુવન્ત્યનેનાઙ્ગ પ્રતિબુધ્ય નિશાત્યયે ।
તેષાં પ્રાણાત્યયે ચાહં દદામિ વિમલાં મતિમ્ ॥ ૨૫॥

શ્રીશુક ઉવાચ
ઇત્યાદિશ્ય હૃષીકેશઃ પ્રધ્માય જલજોત્તમમ્ ।
હર્ષયન્ વિબુધાનીકમારુરોહ ખગાધિપમ્ ॥ ૨૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
અષ્ટમસ્કન્ધે ગજેન્દ્રમોક્ષણં નામ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ પઞ્ચમોઽધ્યાયઃ - ૫ ॥

શ્રીશુક ઉવાચ
રાજન્નુદિતમેતત્તે હરેઃ કર્માઘનાશનમ્ ।
ગજેન્દ્રમોક્ષણં પુણ્યં રૈવતં ત્વન્તરં શ‍ૃણુ ॥ ૧॥

પઞ્ચમો રૈવતો નામ મનુસ્તામસસોદરઃ ।
બલિવિન્ધ્યાદયસ્તસ્ય સુતા અર્જુનપૂર્વકાઃ ॥ ૨॥

વિભુરિન્દ્રઃ સુરગણા રાજન્ ભૂતરયાદયઃ ।
હિરણ્યરોમા વેદશિરા ઊર્ધ્વબાહ્વાદયો દ્વિજાઃ ॥ ૩॥

પત્ની વિકુણ્ઠા શુભ્રસ્ય વૈકુણ્ઠૈઃ સુરસત્તમૈઃ ।
તયોઃ સ્વકલયા જજ્ઞે વૈકુણ્ઠો ભગવાન્ સ્વયમ્ ॥ ૪॥

વૈકુણ્ઠઃ કલ્પિતો યેન લોકો લોકનમસ્કૃતઃ ।

રમયા પ્રાર્થ્યમાનેન દેવ્યા તત્પ્રિયકામ્યયા ॥ ૫॥

તસ્યાનુભાવઃ કથિતો ગુણાશ્ચ પરમોદયાઃ ।
ભૌમાન્ રેણૂન્ સ વિમમે યો વિષ્ણોર્વર્ણયેદ્ગુણાન્ ॥ ૬॥

ષષ્ઠશ્ચ ચક્ષુષઃ પુત્રશ્ચાક્ષુષો નામ વૈ મનુઃ ।
પૂરુપૂરુષસુદ્યુમ્નપ્રમુખાશ્ચાક્ષુષાત્મજાઃ ॥ ૭॥

ઇન્દ્રો મન્ત્રદ્રુમસ્તત્ર દેવા આપ્યાદયો ગણાઃ ।
મુનયસ્તત્ર વૈ રાજન્ હવિષ્મદ્વીરકાદયઃ ॥ ૮॥

તત્રાપિ દેવઃ સમ્ભૂત્યાં વૈરાજસ્યાભવત્સુતઃ ।
અજિતો નામ ભગવાનંશેન જગતઃ પતિઃ ॥ ૯॥

પયોધિં યેન નિર્મથ્ય સુરાણાં સાધિતા સુધા ।
ભ્રમમાણોઽમ્ભસિ ધૃતઃ કૂર્મરૂપેણ મન્દરઃ ॥ ૧૦॥

રાજોવાચ
યથા ભગવતા બ્રહ્મન્ મથિતઃ ક્ષીરસાગરઃ ।
યદર્થં વા યતશ્ચાદ્રિં દધારામ્બુચરાત્મના ॥ ૧૧॥

યથામૃતં સુરૈઃ પ્રાપ્તં કિં ચાન્યદભવત્તતઃ ।
એતદ્ભગવતઃ કર્મ વદસ્વ પરમાદ્ભુતમ્ ॥ ૧૨॥

ત્વયા સઙ્કથ્યમાનેન મહિમ્ના સાત્વતાં પતેઃ ।
નાતિતૃપ્યતિ મે ચિત્તં સુચિરં તાપતાપિતમ્ ॥ ૧૩॥

સૂત ઉવાચ
સમ્પૃષ્ટો ભગવાનેવં દ્વૈપાયનસુતો દ્વિજાઃ ।
અભિનન્દ્ય હરેર્વીર્યમભ્યાચષ્ટું પ્રચક્રમે ॥ ૧૪॥

શ્રીશુક ઉવાચ
યદા યુદ્ધેઽસુરૈર્દેવા બાધ્યમાનાઃ શિતાયુધૈઃ ।
ગતાસવો નિપતિતા નોત્તિષ્ઠેરન્ સ્મ ભૂયશઃ ॥ ૧૫॥

યદા દુર્વાસસઃ શાપાત્સેન્દ્રા લોકાસ્ત્રયો નૃપ ।
નિઃશ્રીકાશ્ચાભવંસ્તત્ર નેશુરિજ્યાદયઃ ક્રિયાઃ ॥ ૧૬॥

નિશામ્યૈતત્સુરગણા મહેન્દ્રવરુણાદયઃ ।
નાધ્યગચ્છન્ સ્વયં મન્ત્રૈર્મન્ત્રયન્તો વિનિશ્ચયમ્ ॥ ૧૭॥

બ્રૂહિ કારણમેતસ્ય દુર્ધર્ષત્વસ્ય મદ્રિપોઃ ।
ઓજઃ સહો બલં તેજો યત એતત્સમુદ્યમઃ ॥ ૨૭॥

ગુરુરુવાચ
જાનામિ મઘવન્ શત્રોરુન્નતેરસ્ય કારણમ્ ।
શિષ્યાયોપભૃતં તેજો ભૃગુભિર્બ્રહ્મવાદિભિઃ ॥ ૨૮॥

(ઓજસ્વિનં બલિં જેતું ન સમર્થોઽસ્તિ કશ્ચન ।
વિજેષ્યતિ ન કોઽપ્યેનં બ્રહ્મતેજઃસમેધિતમ્ ॥)
ભવદ્વિધો ભવાન્ વાપિ વર્જયિત્વેશ્વરં હરિં
નાસ્ય શક્તઃ પુરઃ સ્થાતું કૃતાન્તસ્ય યથા જનાઃ ॥ ૨૯॥

તસ્માન્નિલયમુત્સૃજ્ય યૂયં સર્વે ત્રિવિષ્ટપમ્ ।
યાત કાલં પ્રતીક્ષન્તો યતઃ શત્રોર્વિપર્યયઃ ॥ ૩૦॥

એષ વિપ્રબલોદર્કઃ સમ્પ્રત્યૂર્જિતવિક્રમઃ ।
તેષામેવાપમાનેન સાનુબન્ધો વિનઙ્ક્ષ્યતિ ॥ ૩૧॥

એવં સુમન્ત્રિતાર્થાસ્તે ગુરુણાર્થાનુદર્શિના ।
હિત્વા ત્રિવિષ્ટપં જગ્મુર્ગીર્વાણાઃ કામરૂપિણઃ ॥ ૩૨॥

દેવેષ્વથ નિલીનેષુ બલિર્વૈરોચનઃ પુરીમ્ ।
દેવધાનીમધિષ્ઠાય વશં નિન્યે જગત્ત્રયમ્ ॥ ૩૩॥

તં વિશ્વજયિનં શિષ્યં ભૃગવઃ શિષ્યવત્સલાઃ ।
શતેન હયમેધાનામનુવ્રતમયાજયન્ ॥ ૩૪॥

તતસ્તદનુભાવેન ભુવનત્રયવિશ્રુતામ્ ।
કીર્તિં દિક્ષુ વિતન્વાનઃ સ રેજ ઉડુરાડિવ ॥ ૩૫॥

બુભુજે ચ શ્રિયં સ્વૃદ્ધાં દ્વિજદેવોપલમ્ભિતામ્ ।
કૃતકૃત્યમિવાત્માનં મન્યમાનો મહામનાઃ ॥ ૩૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામષ્ટમસ્કન્ધે પઞ્ચદશોઽધ્યાયઃ ॥ ૧૫॥

